B.A./3rd Sem/SAN/25(NEP)

# 2025

## 3rd Semester Examination (CCFUP : NEP)

## SANSKRIT

### Paper : MJ 3-T (Single Core Major)

### [Classical Sanskrit Literature (Poetry)]

Full Marks : 60 Time : Three Hours

*The figures in the margin indicate full marks. Candidates are required to give their answers in their own words as far as practicable.*

1. अधोलिखितेषु सुरगिरा देवनागर्या च पूर्णवाक्येन पञ्च प्रश्नाः समाधेया : 2×5=10

(क) "तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्" — इत्यत्र 'तितीर्षुः' इति पदस्य व्युत्पत्तिं प्रदर्श्य अर्थो निर्णेयः।

(ख) भर्तृहरिरचितं शतकत्रयं किम्?

(ग) कालिदासमते मनीषिणां माननीयः कः? तस्य माननीयता केन सह तुलिता?

(घ) "सौन्दरानन्दमिति महाकाव्यस्य रचनाकारः कः? महाकाव्येऽस्मिन् कति सर्गाः सन्ति?

P.T.O.

(ङ) मेना का? सा कां महतो मुनिव्रतात् निवारयितुमचेष्टत?

(च) तपश्चरणकाले पार्वत्याः पारणाविधिः कीदृशः बभूव?

(छ) "वर्णिलिङ्गी" इति पदस्य कोऽर्थः? कः खलु वर्णिलिङ्गी?

(ज) "अदेवमातृक" पदस्य कोऽर्थः? कथं कुरवः अदेवमातृकाः जाताः?

2. अधोलिखितेषु **प्रश्नचतुष्टयं** समाधेयम् (**एकस्य** प्रश्नस्य उत्तरमवश्यमेव सुरगिरा देवनागर्या च प्रदेयम्) : 5×4=20

(क) सप्रसङ्गं व्याख्या कार्या —

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥

**अथवा**

मनीषिताः सन्ति गृहेषु देवता—
स्तपः क्व वत्से क्व च तावकं वपुः।
पदं सहेत भ्रमरस्य पेलवं
शिरीषपुष्पं न पुनः पतत्रिणः॥

(ख) सप्रसङ्गं व्याख्या कार्या —

तथापि जिह्मः स भवज्जिगीषया
तनोति शुभ्रं गुणसम्पदा यशः।
समुन्नयन् भूतिमनार्यसङ्गमाद्
वरं विरोधोऽपि समं महात्मभिः॥

**अथवा**

विषयमेकमाश्रित्य संक्षेपेण टीका लेखनीया —

नैषधचरितम्, गीतगोविन्दम्, बुद्धचरितम्

(ग) भावसम्प्रसारणं कार्यम् —

हितं मनोहारि च दुर्लभं वचः।

**अथवा**

हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा।

(घ) मेघदूतमिति काव्यस्य साहित्यिकमूल्यं विचारणीयम्।

(ङ) व्याकरणदिशा पञ्चानां पदानां प्रकृतिप्रत्ययौ प्रदर्शनीयौ —

सहेत, समुन्नयन्, तनोति, विजिगीषूणाम्, बभार, मनीषिताः, निवारयन्ती।

(च) (i) व्यासवाक्येन सह पदद्वयस्य समासो निर्णेयः — 2×2

सूर्यप्रभवः, अनार्यसङ्गमात्, भग्नमनोरथा

(ii) सन्धिविच्छेदं कुरु — 1×1

मोहादुडुपेनास्मि अथवा ह्यग्नौ।

3. प्रश्नत्रयं समाधेयम् : 10×3=30

(क) महाकाव्यरचयितृरूपेण माघकवेः कृतित्वं विचारणीयम्।

(ख) गीतिकाव्यमिति किम्? संस्कृतगीतिकाव्यानां क्रमविकाशः आलोचनीयः।

(ग) रघुवंशमहाकाव्यमाश्रित्य महाराजस्य दिलीपस्य चरित्रवैशिष्ट्यानि उल्लेखनीयानि।

(घ) तव पाठ्यांशानुसारतः कुमारसम्भवमिति काव्ये महाकवेः कालिदासस्य वर्णनानैपुण्यमालोचनीयम्।

(ङ) छलेन प्राप्तं राज्यं स्वायत्तीकर्त्तुं यासां नीतीनां प्रयोगः दुर्योधनेन कृतः तत्सर्वं पाठ्यांशम् अवलम्ब्य वर्णयत।

---